श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीभाष्यकार अवयव विशेष श्लोकम् ॥

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*]This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीभाष्यकार अवयव विशेष श्लोकम् ॥

मस्तकः श्रीशठारातिः नाथार्यो मुखमण्डलम्।
नेत्रयुग्मं सरोजाक्षः कपोलौ राघवस्तथा॥ १ ॥

वक्षस्स्थलं यामुनार्यः कण्ठः पूर्णो महांस्तथा।
गोष्ठीपूर्णो बाहुयुग्मं शैलपूर्णः स्तनद्वयम्॥ २ ॥

कुक्षिस्तु वररङ्गार्यः पृष्ठं मालाधरस्तथा।
कटिः काञ्चीमुनिर्ज्ञेयः गोविन्दार्यो नितम्बकः॥ ३ ॥

भट्टवेदान्तिनौ जङ्घे ऊरुयुग्मं जगद्गुरुः।
जानुयुग्मं कृष्णपादो लोकार्यः पादपङ्कजे॥ ४ ॥

श्रीशैलनाथस्तद्रेखा पादुके वरयोगिराट्।
पुण्ड्रः सेनापतिः प्रोक्तः सूत्रं कूरपतिस्तथा॥ ५ ॥

भागिनेयस्त्रिदण्डश्च काषायश्चान्ध्रपूर्णकः।
मालाश्च कुरुकेशार्यः छाया श्रीचापकिङ्करः॥ ६ ॥

एवं रामानुजार्यस्यावयवानखिलान् गुरून्।
महान्तञ्चावयविनं रामानुजमुनिं भजे॥ ७ ॥

गुरुमूर्त्यात्मयोगीन्द्रं यो ध्यायेत् प्रत्यहं नरः।
सर्वान् कामानवाप्नोति लभेच्चान्ते परंपदम्॥ ८ ॥

॥ इति श्रीभाष्यकार अवयव विशेष श्लोकं संपूर्णम् ॥

www.prapatti.com